संस्कृत-वार्ता:

दिनाङ्क: 23.03.2026 प्रात: - 06:55

## अथ वार्ताः

### पीएम-सीसीएस-संगोष्ठी-

प्रधानमन्त्री श्रीनरेन्द्रमोदी ह्यः मन्त्रिमण्डलसमितेः सुरक्षासम्बद्धस्य सभायाः अध्यक्षतां कृत्वा पश्चिम-एशिया-सङ्घर्षस्य दृष्ट्या प्रचलित-विद्यमानस्य समीक्षां कृतवान् । श्रीमोदी अवदत् यत्, एतत् युद्धं एतावत् विकसितम् अस्ति येन सम्पूर्णं विश्वं केनचित् रूपेण प्रभावितम् वर्तते । सः अवदत् यत् एतस्यां परिस्थितौ युद्धस्य प्रभावात् नागरिकाणां रक्षणार्थं सर्वे प्रयत्नाः करणीयाः। प्रधानमन्त्रिणा निर्देशः दत्तः यत् सर्वकारस्य सर्वे विभागाः मिलित्वा जनेभ्यः न्यूनातिन्यूनतमाम् असुविधां सुनिश्चितीकुर्युः ।

सः राज्यसर्वकारैः सह समुचितसमन्वयनस्य आग्रहं अपि कृतवान् यत्ते सावधानाः भवेयुः यत् महत्त्वपूर्णवस्तूनाम् कृष्णविपणनं, संग्रहणं वा न भवेत् ।

### एयर इण्डिया-उड्डयनं पश्चिम एशिया :

एयर इण्डिया, एयर इण्डिया एक्स्प्रेस् च मिलित्वा अद्य पश्चिम एशियां प्रति गमनागमनार्थं त्रिंशत् निर्धारित-अनिर्धारित-विमानयानानां परिचालनं करिष्यन्ति । अवधेयं यत् एतदतिरिच्य अनेकमार्गेषु सेवाः सीमिताः एव सन्ति ।

### संसत् अद्य

केन्द्रीय-वित्त तथा निगम-व्यवहार-मन्त्री निर्मला सीतारामन् अद्य लोकसभायां निगमविधि-विधेयकम् विंशतिः-षड्विंशिः इत्यस्य प्रस्तावं करिष्यति । तदतिरिक्तं वित्तविधेयकम् विंशतिः-षड्विंशिः इत्यस्य अपि विचारार्थं पारितार्थं च सदनस्य अद्यतनव्यापारे सूचीकृतम् अस्ति।

अद्य राज्यसभायां केन्द्रीयगृहमन्त्री अमितशाहः केन्द्रीय-सशस्त्र-आरक्षि-बलस्य-सामान्यप्रशासनस्य-विधेयकं विंशतिः-षड्विंशिः इत्यस्य प्रस्तावं करिष्यति ।

### खनिज-सघोषविक्रयः

केन्द्रीय-कृष्णांगार-खनिज-मन्त्री जी.किशन रेड्डी अद्य महत्वपूर्ण-सामरिक-खनिज-खण्डानां सघोषविक्रयणस्य सप्तम-खण्डस्य उद्घाटनं करिष्यति । सप्तमः खण्डः खननपट्टस्य, समग्र-अनुज्ञापत्रस्य च अन्तर्गतं विविध-राज्येषु नवदश-घटकानि प्रदास्यति । खनिज-मन्त्रालयेन उक्तं यत् सघोषविक्रयणं पारदर्शकं कर्तुम्, अन्तर्जालीय-माध्यमेन क्रियते, यत्र सफलस्य विक्रेतुः चयनं खनिजस्य मूल्यस्य उच्चतमप्रतिशतस्य आधारेण भविष्यति ।

## दिल्ली विधानसभा

दिल्ली-विधानसभायाः आयव्ययप्रतिवेदनसत्रम् अद्यारभ्य पञ्चविंशति-दिनांकपर्यन्तं भविष्यति । विधान-सभाध्यक्षः विजेन्द्र-गुप्ता अष्टमविधानसभायाः चतुर्थसत्रस्य द्वितीयभागस्य सज्जतायाः समीक्षां कृतवान् । मुख्यमन्त्री रेखागुप्ता दिल्ल्याः आर्थिकसर्वेक्षणप्रतिवेदनं प्रस्तुतं करिष्यति । अस्मिन् सत्रे दिल्लीविधानसभा स्वसदस्यानां सहायार्थं स्वकीयं आन्तरिकं ए-आइ-सक्षमं चैट्बोट् विधानसाथीति प्रवर्तयिष्यति अथ देशे एतमुपक्रमं प्रवर्तयिष्यमाण-प्रथमा विधानसभा भविष्यति ।

## केरलम् नामाङ्कनम्

केरलम्-विधानसभायाः निर्वाचनार्थं नामाङ्कन-प्रक्रिया अद्य सायंकाले समाप्ता भविष्यति । अद्य अपराह्णे त्रि-वादनपर्यन्तं केरलम्-विधानसभानिर्वाचनार्थं अभ्यर्थिनः स्वनामाङ्कनं प्रदातुं शक्नुवन्ति। अद्यतन-प्रक्रिया प्रातः एकादश-वादने आरभ्यते । श्वः नामाङ्कनपत्राणां सर्वेक्षणं भविष्यति, अभ्यर्थीनां नामाङ्कनस्य प्रत्यादानार्थं अस्य मासस्य षड्-विंशति-दिनाङ्कपर्यन्तं समयः भविष्यति । अधुना यावत् केरलस्य चत्वारिंशदुत्तर-एकशतं निर्वाचनक्षेत्रेषु आहत्य एकचत्वारिंशदुत्तर-त्रिशतं अभ्यर्थिनः अवेदनं कृतवन्तः सन्ति ।

## पश्चिम-एशिया-युद्धम्

इजरायलस्य प्रधानमन्त्री बेन्जामिन नेतन्याहू वैश्विकनेतृभ्यः इरान्-सङ्घस्य सम्मुखीकरणार्थं इजरायल्-अमेरिका-देशयोः सह सम्मेलनार्थम् आग्रहं कृतवान् । एतदर्थं सः वर्तमान-क्षेपणास्त्र-आक्रमणानां उद्धरणं दत्तवान्, येषु अरद्-दिमोना-क्षेत्रेषु शतशः जनाः घातिताः, आवासीयक्षेत्राणि च क्षतिग्रस्तानि अभवन् । परन्तु इरान्देशेन उक्तं यत् एतेषु आक्रमणेषु, पूर्वं स्वस्य नतांज् परमाणुसुविधायां प्रहारस्य प्रतिक्रियारूपेण, सामरिकस्थलानि एव लक्षीकृतानि ।

॥ इति वार्ताः॥